# श्रीसुरसरस्वतीसभा शृङ्गेरी

## तुरीया परीक्षा

## द्वितीयपत्रिका

दिनाङ्कः - 06-09-2026 अङ्काः - 50

अपराहणे - 1:30 तः 3:00 पर्यन्तम् समयः - सार्धैकहोरा

<u>सूचना - सर्वाणि उत्तराणि संस्कृतेन एव लेखनीयानि</u>

**1 विषयमेकम् अधिकृत्य दशभिः वाक्यैः प्रबन्धमेकं लिखत ।** **5**

१. भारतदेशः २. काव्यम् ३. संस्कृतदिनम्

**2** (अ) लुट्-लकारः कदा प्रयुज्यते ? लुट्-लकारस्य प्रत्ययान् निर्दिशत । **4**

(आ) द्वितीयाविभक्तिः कदा भवति ? सोदाहरणं विवृणुत । **4**

**3** (अ) अर्थान्तरन्यास-अलङ्कारं सोदाहरणं सलक्षणं विशदयत । **4**

(आ) “स्वभाव एवैष परोपकारिणाम्”- अत्र किं वृत्तमिति सलक्षणं सप्रस्तारं च विवृणुत । **4**

**4 उत्तरं लिखत । (त्रयाणामेव)** **3**

१. भावे-प्रयोगः इति शब्दे ‘भावः’ नाम कः ?

२. भीतिः इति शब्दस्य योगे तत्सम्बद्धं पदं कस्यां विभक्तौ भवेत् ?

३. छन्दश्शास्त्रानुसारेण कस्मिन् गणे आदावेव गुरु भवति ?

४. विरामचिह्नं कदा प्रयोक्तव्यम् ?

**5 द्वयोः लकारयोः पुरुषत्रये सर्वरूपाणि लिखत ।** **6**

१. वर्धिषीष्ट २. अत्यक्ष्यत् ३. लब्धा ४. अकार्षीत्

**6 प्रयोगपरिवर्तनं कुरुत ।** **4**

१. त्वमक्रीडः । २. चन्द्रापीडेन भूयेत ।

३. कृष्णेन कालियस्य फणासु नर्तितम् । ४. उभाभ्यां बालाभ्यां हस्यते ।

**7 वाक्यदोषं परिहरत ।** **4**

१. अद्य अहं शालाम् अगच्छत् ।

२. श्रीरामः धनुर्विद्भ्यः श्रेष्ठः ।

३. रामः रावणे अभिक्रुध्यति ।

४. ग्रामस्य उभयतः वनानि सन्ति ।

**8 टिप्पणीं लिखत । (एकस्य)** **2**

१. सति-सप्तमी　　　　२. निर्धारणम्

**9 मातृभाषया अनुवदत ।** **5**

१. अन्तरेण गुरुशुश्रूषां नावाप्यते विद्या ।

२. तेन धूर्जगतो गुर्वी सचिवेषु निचिक्षिपे ।

३. पाण्डवाः द्वादश वर्षाणि वनेऽवात्सुः ।

४. पयः पेयाः, आरोग्यं च लप्सीष्ठाः ।

५. देहल्यां नैदाघं तापं कथं सोढासे ?

**10 संस्कृतभाषया परिवर्तयत ।** **5**

१. ವಸ್ತ್ರಗಳಲ್ಲಿ ನೀಲಿವಸ್ತ್ರ ನನಗೆ ಹಿಡಿಸುತ್ತದೆ.

Among the clothes, I like the blue cloth.

२. ಮಗಳು ಪರೀಕ್ಷೆಯಲ್ಲಿ ಉತ್ತೀರ್ಣಳಾಗಲು ತಾಯಿ-ತಂದೆಯರು ಸಂತೋಷಿಸಿದರು.

Parents felt happy when the daughter passed in the exam.

३. ಸೀತೆ ಯಾವ ಕಷ್ಟವನ್ನು ಲೆಕ್ಕಿಸಲಿಲ್ಲ.

Seetha did not mind any trouble.

४. ಶುಕಸಾರಣರು ವಾನರಸೇನೆಯನ್ನು ನೋಡಿದರು.

Suka and Sarana saw the army of the vanaras.

५. ನೀವೆಲ್ಲರು ವಿದ್ಯೆಯನ್ನು ಪಡೆಯಿರಿ.

May you all attain knowledge.

---------------------------